श्रीः

श्रीमते रामानुजाय नमः

# सुदर्शनकवचं

अस्य श्रीसुदर्शनकवचमहामन्त्रस्य भगवानन्तर्यामी नारायण ऋषिः, अनुष्टुप् छंदः, श्रीसुदर्शनरूपी श्रीमन्नारायणो देवता । रं बीजं हुं शक्तिः फट् कीलकं श्रीसुदर्शनप्रसादसिद्ध्यर्थे विनियोगः । "शंखं चक्रं गदा पद्मं मुसलं खड्गमेवच । धेनुश्च यमपाशश्च मुद्राह्येताः प्रकीर्तिताः ।।" पाञ्चजन्याय शंखाधिपतये नमः, सुदर्शनाय हेतिराजाय नमः, कौमोदक्यै गदाधिपतये नमः, पं पद्माय नमः, मुं मुसलाय नमः, नं नन्दकाय खड्गाधिपतये नमः, सुं सुरभ्यै नमः, यं यमपाशाय नमः ।

**ध्यानं**

शंखंशार्ङ्गं सखेटं हलपरशुगदाकुन्तपाशान्दधानं
त्वन्यैर्वामैश्चचक्रेष्वसिमुसललसद्वज्रशूलांकुशाग्नीन्
ज्वालाकेशं किरीटं ज्वलदनलनिभं वन्हिमुग्रस्थपीठं
प्रत्यालीढं त्रिनेत्रं रिपुगणदमनं भावये चक्रराजं।।

मस्तकं मे सहस्रारः फालं पातु सुदर्शनः
भ्रुवौ मे चक्रराट् पातु नेत्रे द्वेऽर्केंदुलोचनः ।। १
कर्णौ वेदैस्स्तुतः पातु पातु घ्राणं विभीषणः
महादीप्तः कपोलौ मे ओष्ठौ रुद्रवरप्रदः ।। २





दन्तान्पातु जगद्वंद्यो रसनां मम सर्वदा
सर्वविद्यार्णवः पातु गिरं वागीश्वरो मम ।। ३
वीरसिंहो मुखं पातु चिबुकं भक्तवत्सलः
सर्वदा पातु मे कंठं मेघगंभीरनिस्स्वनः ।। ४
मम स्कंधयुगं पातु धराभारापहारकः
बाणासुरभुजारण्यदावाग्निः पातु मे भुजौ ।। ५
कालनेमिशिरश्छेत्ता पातुमे कूर्परद्वयं
करौ दिव्यायुधः पातु नखान्वज्रनखोपमः ।। ६
कक्षौ पातु महाशूरः स्तनौ शत्रुनिषूदनः
पातु मे हृदयं भक्तजनानंदश्च सर्वदा ।। ७
सर्वशास्त्रार्थसद्भूतिहेतुः पातूदरं मम
वक्षः पातु महाधारो दिवि दानवमर्दनः ।। ८
पार्श्वौ मे पातु दीनार्तशरणागतवत्सलः
सर्वदा पृष्ठदेशं मे देवानामभयप्रदः ।। ९
नाभिं षट्कोणधामा मे पातु घण्टारवः कटिं
आदिमूलः पुमान् पातु गुह्यदेशं निरंतरं ।। १०
ऊरू पातु महाशूरो जानुनी भीमविक्रमः
जङ्घे पातु महावेगो गुल्फे पातु महाबलः ।। ११
पादौ पातु सदा श्रीदो ब्रह्माद्यैरभिवंदितः
पातु पादतलद्वंद्वं विश्वभारो निरंतरं।।१२
सुदर्शननृसिंहो मे शरीरं पातु सर्वदा
मम सर्वांगरोमाणि ज्वालाकेशस्स रक्षतु।।१३
अंतर्बहिश्च मे पातु विश्वात्मा विश्वतोमुखः

रक्षाहीनञ्च यत्स्थानं प्रचंडस्तत्र रक्षतु।।१४
सर्वतोदिक्षु मे पातु ज्वालाशतपरीवृतः
त्रिनेमिः पातु मत्प्राणान्  भ्रातॄन्पात्वनलद्युतिः।।१५
भार्यां लक्ष्मीसखः पातु पुत्रान्पातु सुदर्शनः
श्रीकरो मे श्रियःपातु बंधून्पातु बलाधिकः।।१६
गोपांश्चैव पशून्पातु सहस्रारधरस्सदा
क्षेत्रं विश्वंभरः पातु मित्रं पात्वघनाशनः।।१७
दिवारात्रौ च मां  पातु अहिर्बुध्न्यवरप्रदः
षोडशोत्तुङ्ग बाहुस्तु पातुमे राजसम्मुखं।। १८
वैरिविद्वेषसङ्के तु संग्रामे  शत्रुसूदनः
अवांतरा अबाधाश्च त्रासयेत्सर्वकालिकं।।१९
आधिव्याधि महाव्याधि मध्यतोपद्रवेऽपिच
अपमृत्युमहामृत्यू नाशयेच्चक्रनायकः ।। २०
परप्रयुक्तमन्त्रांश्च यन्त्रतन्त्रविभञ्जनः
सुदर्शनोऽयमस्माकं दुर्दशादुःखनाशनः ।। २१
सर्वसंपत्प्रदाता मां चक्रराजो निरंतरं
जपं पातु जगद्वन्द्यो मानसामक्षयप्रदः।। २२
प्रमादांश्चास्त्रधामासौ ज्ञानं रक्षतु सर्वदा
अणिमादिमहैश्वर्यं पातु साम्राज्यसिद्धिदः ।।२३
तिर्यग्ज्वालाग्निरूपश्च नष्टराज्यार्थदो मम
राज्यंपातु सहस्रारः पदातिं पातु चाच्युतः ।।२४
चतुरङ्ग बलस्तोमं रक्ष त्वं चक्रभावनः
ज्योतिर्मयश्चक्रराजः सर्वान्वरुणरक्षकः ।। २५





अखंडमंडितः पातु परचक्रापहारकः
त्रिविक्रमश्चक्रराजः पातु धैर्यं सदा मम ।। २६
नभोदशदिशव्याप्ति कीर्तिं पातु सुदर्शनः
आयुर्बलं धृतिं पातु लोकत्रयभयापहः ।। २७
सुधामंडलसंविष्टो मायापञ्चसुशीतलः
राजद्वारे सभामध्ये पातु मां चंडविक्रमः ।। २८
पूर्वे सुदर्शनः पातु आग्नेये पातु चक्रराट्
याम्ये रथाङ्गकः पातु त्रिनेमिः पातु नैरृते ।।२९
लोकत्रय प्रभाकार ज्वालो रक्षतु पश्चिमे
षट्कोणः पातु वायव्ये ह्यस्त्रराजोत्तरां दिशं ।। ३०
ऐशान्यां चक्रराट्पातु मध्येभूचक्रचक्रिणः
अनंतादित्यसंकाशः क्ष्मांतरिक्षौ च पातु मे ।। ३१
सर्वतोदिक्षु मे पातु ज्वालासाहस्रसंयुतः
एवं सर्वत्र संरक्ष सर्वदा सर्वरूपवान् ।। ३२
सकारः पृथिवी ज्ञेयो हकारो अप उच्यते
स्राकारो वायुरुक्तश्च रकारोऽम्बर उच्यते ।। ३३
हुंकारमग्निरित्याहुः फट्कारं सूर्यरूपकं
स्वाहाकारं न्यसेन्मूर्ध्नि पीतरक्तसुवर्णकं ।। ३४
सकारं नासिकायां तु हकारं वदने न्यसेत्
स्राकारं हृदयेचैव सृष्टिसंहारकारणं ।। ३५
रकारं विन्यसेद्गुह्ये हुंकारं जानुदेशके
फकारं गुल्फदेशेतु टकारं पादयोर्न्यसेत् ।। ३६
सर्वाणि चैव वर्णानि जप्यान्यंगुलिपर्वसु

क्षिप्रं सौदर्शनं चक्रं ज्वालामालातिभीषणं ।। ३७
सर्वदैत्यप्रशमनं कुरु देववराच्युत
सुदर्शनमहाज्वाल छिंधि छिंधि सुवेदनां ।। ३८
परयन्त्रञ्च तन्त्रञ्च छिंधि मन्त्रौषधादिकं
सुदर्शन महाचक्र गोविंदस्य करायुध ।। ३९
सूक्ष्माधार महावेग छिंधि छिंधि सुभैरवं
छिंधि पातंच लूतंच छिंधि घोरं महद्विषं ।। ४०
इति सौदर्शनं दिव्यं कवचं सर्वकामदं
सर्वबाधाप्रशमनं सर्वव्याधिविनाशनं ।। ४१
सर्वशत्रुक्षयकरं सर्वमङ्गलदायकं
त्रिसंध्यं विजयं नृणां सर्वदा विजयप्रदं ।। ४२
सर्वपाप प्रशमनं भोगमोक्षैकसाधनं
प्रातरुत्थाय यो भक्त्या पठेदेतत्सदानरः ।। ४३
तस्य सर्वेषु कालेषु विघ्नः क्वापि न जायते
यक्षराक्षसवेताल भैरवाश्च विनायकाः ।। ४४
शाकिनीडाकिनी ज्येष्ठा निद्राबालग्रहादयः
भूतप्रेतपिशाचाद्या अन्ये दुष्टग्रहा अपि ।। ४५
कवचस्यास्य जप्तारं दृष्टमात्रेण तेऽखिलाः
पलायंते यथानागाः पक्षिराजस्य दर्शनात् ।। ४६
अस्यायुतं पुरश्चर्यं दशांशं तिलतर्पणं
हवनं तर्पणञ्चैव तर्पणं गंधवारिणा ।। ४७
पुष्पाञ्जलिर्दशांशं च मिष्टान्नं सघृतप्लुतं
चतुर्विंशद्द्विजान्भोज्य ततः कार्याणि साधयेत् ।। ४८





विन्यस्याङ्गेष्विदं धीरो युद्धार्थं योऽभिगच्छति
रणे जित्वाखिलाञ्छत्रून् विजयी भवति ध्रुवं ।। ४९
मन्त्रितांबु त्रिवारं वा पिबेत्सप्तदिनावधि
व्याधयः प्रविनश्यन्ति सकलाः कुक्षिसंभवाः ।। ५०
मुखप्रक्षालने नेत्र नासिका रोगनाशनं
भीतानामभिषेकं च महाभयनिवारणं ।। ५१
सप्ताभिमन्त्रितानेन तुलसीमूलमृत्तिका
लेपान्नश्यन्ति ते रोगाः सद्यः कुष्ठादयोऽखिलाः ।। ५२
ललाटे तिलकं स्त्रीणां मोहनं सर्ववश्यकृत्
परेषां मन्त्रयन्त्राणि तन्त्राण्यपि विनाशकृत् ।। ५३
व्यालसर्पादिसर्वेषां विषापहरणं परं
सौवर्णे राजते वापि भूर्जे ताम्रादिकेऽपि वा ।। ५४
लिखित्वा त्वर्चयेद्भक्त्या स श्रीमान्भवति ध्रुवं
बहुना किमिहोक्तेन यद्यद्वांछति यो नरः ।। ५५
सकलं प्राप्नुयादस्य कवचस्य प्रसादतः ।।

।। इति श्रीविहगेन्द्रसंहितान्तर्गतं श्रीसुदर्शनकवचं समाप्तं ।।

श्रीमते रामानुजाय नमः

मंडयं नायक रामानुज